**International Journal of Research in Social Sciences**
Vol. 7 Issue 4, April 2017
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# पाणिनीयसूत्राणां सरलाभिव्यक्तिः

-डॉ. जयप्रकाश साहु

## हलन्त्यम् (पा. 1.1.3)

हल् इति सूत्रेऽन्त्यमित्स्यात्; इति वृत्तिः ।[1] हलन्त्यमिति सूत्रे योऽन्योन्याश्रयदोषः [2] तं दोषमपनेतुं श्रीभट्टोजिदीक्षितेन हलन्त्यमिति सूत्रस्य आवृत्तिः कृता। तस्मिन्नेवान्योन्याश्रय-दोषपरिहारप्रङ्गे 'श्रीनागेशभट्टः कथयति यत् 'स्यादेतदिति।'[3] अत्र खलु 'स्यात्' पदस्य प्रयोगः सम्भावनायां लिङ्लकारं विधाय कृतो विराजते। अस्य तात्पर्यमिदमस्ति यद् एते वक्ष्यमाणाः उपाया अपि भवन्ति। एतेषां वक्ष्यमाणोपायानां विवरणात् पूर्वमन्योन्याश्रयदोषः कः? 'हलन्त्यम्' इति सूत्रेऽन्योन्याश्रयदोषस्य स्थितिः कथं सम्भवति? इति विचारणायामुच्यते-वाक्यार्थज्ञानं प्रति पदार्थज्ञानं हेतुर्भवति 'हलन्त्यमि'ति सूत्रस्य वाक्यार्थबोधाय हल्पदार्थज्ञानमावश्यकम्। हल्पदार्थज्ञानञ्च 'आदिरन्त्येन सहेता' इति सूत्रस्य वाक्यार्थबोधं विना न संभवति। 'आदिरन्त्येन सहेता' इति सूत्रस्य वाक्यार्थबोधञ्च इत्पदार्थज्ञानाधीनमस्ति। एव 'हलन्त्यमि'ति सूत्रस्य वाक्यार्थज्ञानम् 'आदिरन्त्येन सहेता' इति सूत्रस्य वाक्यार्थबोधाधीनम् 'आदिरन्त्येन सहेता' इति सूत्रस्य वाक्यार्थबोधो 'हलन्त्यमि'ति सूत्रस्य वाक्यार्थबोधाधीनोऽस्तीति परस्परसापेक्षत्वादन्योन्या-श्रयदोषप्रसङ्गः।[4]

नागेशभट्टोऽन्योन्याश्रयदोषपरिहाराय पूर्वपक्षत्वेन पक्षत्रयमुद्भाव्य तत्र त्रिष्वप्यरुचिं प्रदर्श्य भाष्यसम्मतस्याथ च भट्टोजिदीक्षितप्रतिपादितस्य पूर्णसूत्रावृत्तिरूपपरिहारस्य समर्थनं विदधाति।[5] तदनुसारं हल् च हल् च इति हल् इत्येकशेषे सति हल अन्त्यमिति सम्बन्धसामान्ये निरुप्यनिरूपकभावे षष्ठीं विधाय हलन्त्यमिति समासो विधीयते। द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते इत्युक्तिदिशा अन्त्यशब्दस्योभयत्रान्वयेन हलसूत्रान्त्यं हलरूपान्त्यञ्चेदिति सूत्रार्थो फलति।[6]

## आदिरन्त्येन सहेता (पा. 1.7.71)

'अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्याद्' इति सूत्रवृत्तिः।[7] 'आदिरन्त्येन सहेता'[8] इतिसूत्रं प्रत्याहारविधायकमस्ति। अन्त्येन इत्संज्ञकेन वर्णेन सह आदिवर्णं गृहीत्वा अण्, अच्, हलादिप्रत्याहाराणां सिद्धिर्भवति।

सूत्रेऽस्मिन् शङ्केयमुदेति यत् सूत्रपठितेन अन्त्यपदेनैव आदिपदाक्षेपः सम्भवस्तदाऽत्र 'आदिः' ग्रहणं किमर्थम्? समाधानं तावदिदं क्रियते-यत् अन्त्यपदेनादिपदस्याक्षेपे प्रमाणाभावः। यद् अन्त्यत्वं भवति तत्तु पूर्वस्मान्निरुप्यते। अतोऽन्त्यपदेन पूर्वस्याक्षेपो भविष्यति सूत्रार्थोऽयं भविष्यति-अन्त्येत्सहितो यः पूर्वः, सः प्रत्यासत्या पूर्ववर्णानां संज्ञकः स्यात्। अथवा अन्त्येत्-सहितो वर्णोऽन्त्येनाक्षिप्तान्त्यवर्णघटितसमुदायघटकवर्णानां संज्ञकः (बोधकः) स्यात्। इत्थं सूत्रार्थे जाते सति इक् उक् इत्यादि प्रत्याहारेषु इकारादिवत् पूर्वत्वेन अकारस्यापि ग'हणं स्यात् तत्तु सर्वथानभीष्टमेव। इत्थमेव यदि सूत्रे अन्त्यपदस्य उपादानं न क्रियते तर्हि आदिशब्देन परस्याक्षेपः स्यात्। परिणामतः

इत्संज्ञकवर्णसहितादिवर्ण: परवर्णबोधक: स्यादिति सूत्रार्थे जाते सति-'इण्' इत्यादिप्रत्याहारेषु ञकारादिवर्णानामपि ग्रहणं प्रतिपद्येत। यतो हि अन्त्यपदाभावे इकाराद्यवयवक-समुदायघटकवर्णानां बोधाऽपेक्षितत्वात् 'इण्' प्रत्याहारे ञकारग्रहणं दुर्वारम्। अत एव सूत्रे अन्त्यपदोपादानं कृतम्।

अन्ते भव: अन्त्य:। तेन इता सहोच्चार्यमाण: आदि: अण् अच् इत्यादिरूप: संज्ञेत्यर्थ:, संज्ञाप्रस्तावात्। तत्र 'यस्मात्पूर्वं नास्ति परमस्ति स आदि:, यस्मात्परं नास्ति पूर्वमस्ति सोऽन्त:' इति आद्यन्तवत्सूत्रे भाष्यम्। तदिहाद्यन्तशब्दाभ्यां मध्यगा आक्षिप्यन्ते। अतस्तेषां संज्ञेति लभ्यते। 'स्वं रूप' मिति[9] पूर्वसूत्रात्स्वमित्यनुवर्तते। तच्च षष्ठ्यन्ततया विपरिणम्यते। तदेतदाह-अन्त्येनेतेत्यादि। स्वस्य चेति। अत्र च स्वशब्देन संज्ञाकोटिप्रविष्ट आदिरेव परामृश्यते, नत्वन्त्योऽपि, अन्त्येनेति तृतीयया 'सहयुक्तेऽप्रधाने'[10] इति विहितया तस्य अप्राधान्यावगमात्, सर्वनाम्नां चोत्सर्गत: प्रधानपरामर्शित्वात्।

न च इक् उक् इच् यय् भयित्यादिप्रत्याहारा: कथं स्यु:, इकारादीनामादित्वाऽभावादिति वाच्यं, न हि सूत्रापेक्षमिहादित्वं किंतु आद्यन्तशब्दाक्षिप्तसमुदायापेक्षम्। ततश्च 'अइउणि'ति इकारमारभ्य 'ऋलृगि'ति ककारपर्यन्तं वर्णसमुदायं बुद्ध्या परिकल्प्य तदादित्वमिकारस्य संभावनीयम्। एवमिजादिष्वपि। तथा अन्त्यत्वमपि बुद्धिकल्पितसमुदायापेक्षमत्र न तु सूत्रापेक्षम्। ततश्च रप्रत्याहार: सुग्रह:। अन्यथा लण्सूत्रे अकारस्याऽन्त्यत्वाभावात्स न स्यात्। अत्राद्यान्तशब्दयोरन्तराऽभावे मध्यगानामिति न लभ्येत। आदिरित्यस्याऽभावे हि अन्त्येनेता सहोच्चार्यमाणो वर्णोऽन्त्यात्प्राग्भाविनां वर्णानां संज्ञेत्वेन लभ्येत। तत्तश्च हल्प्रत्याहारे अकारादिनामपि ग्रहणं स्यात्, अन्त्य-लकारात्पूर्वभावित्वाविशेषात्। अन्त्येनेत्यस्याऽभावे तु आदिरिता सहोच्चार्यमाण आदिरूर्ध्वभाविनां वर्णानां संज्ञेत्येव लभ्येत। ततश्च अच्प्रत्याहारे हकारादीनामपि ग्रहणापत्ति:, आदेरकारादूर्ध्वभावित्वाऽविशेषात्। उभयोरुपादाने तु मध्यगानामिति लभ्यत इत्यदोष:। 'परस्मिन् सति यस्मात्पूर्वो नास्ति स आदि:, पूर्वस्मिन् सति यस्मात्परो नास्ति सोऽन्त्य' इति भाष्ये आद्यन्तशब्दार्थनिर्वचनेन आद्यन्तयोर्मध्यगाऽविनाभूतत्वेन ताभ्यां मध्यगानामाक्षेपात्।

यद्यपि द्वयोरप्याद्यन्तशब्दौ संभवत:, उक्तनिर्वचनाऽविरोधात्, तथापि नेह द्वयोराद्यन्तशब्दौ भवत:। तथा सति हि अन्त्येनेता सह उच्चार्यमाण आदि: स्वस्य आदे: संज्ञेत्येव लभ्येत, उक्तरीत्या स्वशब्देन अन्त्यस्य परामर्शाऽसंभवात्। ततश्च उणित्युकारस्य संज्ञेति पर्यवस्येत्। तत्र एकस्य वर्णस्य वर्णद्वयात्मकसंज्ञाविधानं व्यर्थमापद्येत, गौरवात्, प्रत्याहाराणां व्यवहारलाघवार्थत्वात्। अतो मध्यमसत्त्व एवाऽत्र आद्यन्तशब्दाविति ताभ्यां मध्यगानामिति लभ्यते। इतेति किम्?। अम्प्रत्याहारो ञमङणेति मकारेण माभूत्। नचैवमपि सुट्प्रत्याहार: 'टा' इति टकारेण किं न स्यात्, टान्तसमुदायापेक्षया तस्य अन्त्यत्वादिति वाच्यम्। प्रथमातिक्रमणे कारणाऽभावेन सुट्प्रत्याहारस्य औटष्टकारेणैव ग्राह्यत्वात्। उक्तं च जैमिनिना-'प्रथमं वा नियम्येत कारणस्यानतिक्रमात्।'

सूत्रमिदं प्रत्याहारविधायकम्। अन्त्येन इत्संज्ञकेन वर्णेन सह उच्चार्यमाणमादिवर्णं गृहीत्वा अनेन सूत्रेण अण्, अच् हल् इत्यादय: सर्वे प्रत्याहारा: साध्यन्ते।

अन्यटीकापेक्षया लक्ष्मीटीकाकारेण विशेषतया उद्भावितं-तत्र समुदायस्य संज्ञित्वे अ-इ-उ-ण् इत्यत्र पठितस्य अकारादिचान्तसमुदायस्य अच्पदबोध्यस्य क्वचिदिप्प्प लक्ष्येऽभावेन 'इको यणचि' इत्यादीनां वैयर्थ्यापत्त्या समुदाये प्राप्नुवती संज्ञा तदवयवे विश्रास्यति इति प्रत्याहारेण समुदायघटकवर्णानामेव बोधो न समुदायस्य। तत्र समुदायघटकाद्यन्तयोर्वणयो: 'अच्' इत्यादिष्वकारचकारयोर्बोधकत्वे प्रतिष्ठयोर्बोध्यत्वं

न स्यात्, बोधकत्वेन न बोध्यत्वस्य बाधात्। यथा 'सर्वे ब्राह्मणा भोज्यन्तां माठरकोण्डिन्यौ परिवेविषाताम्' इत्युक्ते माठरकौण्डिन्ययोब्राह्मणान्तर्गतत्वेऽपि परिवेषणकर्तृत्वेन भोजनकर्मत्वस्य बाध:। तथा प्रकृतेऽपि स्यादिति 'स्वं रूपम्' (1.1.68) इति सूत्रात्स्वंरूपमित्यनुवर्त्त्य षष्ठ्यन्तत्वेन विपरिणम्य स्वस्य रूपस्य च अजादिसंज्ञा बोद्धव्या। तदुक्तं मूले-स्वस्य च रूपस्येति। अत्र यद्यपि स्वपदेन बोधकस्य 'अच्' इति समुदायस्य संज्ञा प्राप्नोति तथापि समुदायस्य संज्ञायां फलाभावेन तदवयवस्यादेरेव संज्ञा नान्त्यस्य, 'प्रत्याहारेष्वितां न ग्रहणम्' इत्यनेन निषेधात्। सूत्रे 'अन्त्येन' इति 'सह युक्तेऽप्रधाने' (2.3.19) इत्यनेन जाततृतीयया अन्त्यस्याप्रधानत्वेनादेश्च तदपेक्षया प्रधानत्वेन स्वशब्दस्य सर्वनाम्न: स्वभावत: प्रधानबोधकत्वेन 'स्वस्य च रूपस्य' इत्यनेनादेरेव बोध्यत्वकल्पनाच्च।[11]

## सूत्रार्थे सति हलन्त्यम् (पा. 1.1.71)

उपदेशे अन्त्यं हलित्स्यात् इति सूत्रवृत्ति:।[12] अन्योन्याश्रयदोषपरिहाराय 'हलन्त्यम्' इति सूत्रस्यावृत्ति: श्रीभट्टोजिदीक्षितेन स्वीकृता। 'उपदशेऽन्त्यं हलित्स्यादि'त्यत्र उपदेशशब्दस्य कोऽर्थ: कश्च विषय इति विचारणायां बालमनोरमाकारस्त्वित्थं विषयमेनं विशदीकरोति- "पाणिनि-कात्यायन-पतञ्जलिमुनीनां व्याकरणशास्त्रविषयकं यद् आद्योच्चारणं तत् उपदेशपदेन व्यवह्रियते। उपशब्द आद्यर्थक:। दिशिरुच्चारणकि'यायाम्। भावे घञिति भाव:। एतच्च 'आदेच उपदेशे' इत्यादिसूत्रे भाष्ये स्पष्टम्।

धातुसूत्रगणोणादिवाक्यलि'ानुशासनम्। आगमप्रत्ययादेशा उपदेशा: प्रकीर्तिता:॥ -इति प्राचीनकारिका तु प्रौढमनोरमायां बहुधा दूषिता। उपदेशे किम्-'इदमस्थमु:' इति थमुप्रत्यये उकारस्योच्चारणार्थस्य निवृत्तौ मकारस्य प्रत्ययान्तत्वेऽपि इत्संज्ञा मा भूत्। तदेवं हलन्त्यमिति आवृत्तद्वितीयसूत्रेण चतुर्दशसूत्र्यामन्त्यणकारादिवर्णानामित्संज्ञा सिद्धेति स्थितम्। तत: किमित्यत आह- ततोऽण् अजित्यादिसंज्ञासिद्धाविति। तत: णकारादीना-मित्संज्ञासिद्ध्यनन्तरमा-दिरन्त्येनेत्यणादिसंज्ञा सिद्धेत्यर्थ:" इति।[13] प्रतिज्ञायत इति प्रतिज्ञा। 'आतश्चोपसर्गे' इति कर्मण्यङ्। अनुनासिकस्य भाव आनुनासिक्यम्। 'गुणवचनब्राह्मणादिभ्य:-' इति ष्यञ्। प्रतिज्ञा आनुनासिक्यं येषामिति विग्रह:।

## पूर्वत्रासिद्धम् (पा. 8.2.1)

अधिकारोऽयम्। तेन सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात्।[14] सूत्रेऽस्मिन् पदद्वयमस्ति। पूर्वत्र असिद्धञ्चेति। पूर्वस्मिन्निति सप्तम्यर्थे त्रल् प्रत्यये पूर्वत्रशब्दसिद्धि:। सप्तमी चात्र 'यस्य भावेन भावलक्षणम्' इति सूत्रानुसारिणी वर्तते येन पूर्वत्रशब्दस्यार्थो भवति पूर्वस्मिन् शास्त्रे कर्तव्ये सतीति। पूर्वपदस्य साकांक्षत्वात् परपदलाभात् परपदमसिद्धमिति पदेनान्वेति। एवं सूत्रार्थ: सम्पद्यते यत् पूर्वशास्त्रं प्रति परशास्त्रमसिद्धं भवति। पूर्वपरताया: निर्धारणमपि अस्मात् सूत्रात् क्रियते। एतेन लभ्यते यत् सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा।

अस्यैवार्थस्य बहुसरलया वाचा व्याख्यानं बालमनोरमायां श्री वासुदेव दीक्षितेन विहितं तद्यथा- "पाणिनिप्रणीता अष्टाध्यायी, तत्र अष्टमाध्याये द्वितीयपादस्येदमादिमं सूत्रम्। इत: प्राक्तनं कृत्स्नं सूत्रजालं 'सपादसप्ताध्यायी'ति व्यवह्रियते। उपरितनं तु कृत्स्नं सूत्रजालं त्रिपादीति व्यवह्रियत इति स्थिति:। तत्र यदीदं सूत्रं स्वतन्त्रविधि: स्यात्, तदा इत: पूर्वस्मिन् शास्त्रे प्रवर्तमाने उपरितनं शास्त्रमसिद्धं स्यादित्यर्थो लभ्येत। ततश्च सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धेति पर्यवस्येत। एवं सति त्रिपाद्यामपि पूर्वं शास्त्रं प्रति परं शास्त्रमसिद्धमित्यर्थो न लभ्येत। तथा सति किम् उक्तं किम्वुक्तमित्यत्र 'मोऽनुस्वार:' इति शास्त्रं

त्रैपादिकं प्रति 'मय उञो वो वा'। इति वत्वशास्त्रं त्रैपादिकं नासिद्धं स्यात्। अतएव प्रोक्तम् अधिकारोऽयम्-अधिक्रियते उपरितनसूत्रजालशेषत्वेन पठ्यत इत्यधिकार:। कर्मणि घञ्। 'घञजबन्ता: पुंसि' इति पुंस्त्वम्। अयमिति तदपेक्षया पुंल्लिङ्गेनिर्देश:।

इदं सूत्रमुपरितनसूत्रेष्वनुवृत्त्यर्थमेव, न तु स्वतन्त्रविधिरिति यावत्। 'मय उञो वो वा' इति सूत्रे पूर्वत्रासिद्धमित्यनुवर्त्तते। ततश्च 'मय: परस्य वकारो वो वा स्यात्। इदं शास्त्रं पूर्वत्रासिद्ध'मिति तदेकवाक्यं संपद्यते। तत्र च अनुवृत्तपूर्वशब्देन इत: प्राक्तनं त्रिपादीस्थं सपादसप्ताध्यायीस्थं च कृत्स्नं सूत्रजालं विवक्षितमिति 'मोऽनुस्वार:' इति त्रैपादिकं शास्त्रं प्रति 'मय उञो वो वा' इति शास्त्रस्याऽसिद्धत्वम्। असिद्धत्वं चाऽत्र नात्यन्ताऽसत्त्वम्। किन्तु पूर्वशास्त्रदृष्ट्येत्यनुपदमेवोक्तम्। 'परं शास्त्र' मित्यनेन प्रक्रियाकौमुद्यादिग्रन्थोक्तं कार्यासिद्धत्वमप्रामाणिकमिति ध्वनितम्। कार्याऽसिद्धत्वं पूर्वपक्षयित्वा शास्त्रासिद्धत्वस्यैवात्र सूत्रे, 'असिद्धवदत्राभा' दिति सूत्रे च भाष्ये सिद्धान्तितत्वात्" इति।[15] अस्यायं भाव: - अस्मिन् संज्ञाप्रकरणे 'अ अ' तथा 'पूर्वत्रासिद्धम्' इति सूत्रोपन्यासावश्यकता नासीत् किन्तु विवृतसंवृतप्रयत्नप्रसङ्गे 'अ अ' सूत्रोल्लेख: कृत:। सूत्रमिदम् अष्टाध्यायीं प्रति असिद्धम् अस्ति। एतदसिद्धत्वप्रसङ्गे पूर्वत्रासिद्धम् इति सूत्रस्य उल्लेख: कृत: अत: उभयो प्रासिङ्गिकता अस्ति।

सूत्रेऽस्मिन् 'पूर्वत्र' पदे 'यस्य च भावेन भावलक्षणम्' इति सूत्रेण सप्तमीं विभक्तिं विधाय सप्तम्यर्थे त्रल्प्रत्यय: क्रियते। सपादसप्ताध्यीस्थ-सूत्राणामनन्तरं प्रथमस्त्रिपादीसूत्रं तावत् पूर्वत्रासिद्धम् एव। पूर्वपदस्य साकांक्षत्वादत्र पर पदस्याक्षेप: क्रियते। अत एव सूत्रार्थो भवति-सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा: त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात्। अधिकारसूत्रमिदम्। यद्येतत् सूत्रमधिकारसूत्रं न भूत्वा केवलं विधिसूत्रं स्यात् तदा एतावन्मात्रमर्थ: स्यात्-सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा भवति। 'त्रिपाद्यामपि पूर्वं प्रति परसूत्रम् असिद्धं स्यात्' इत्यर्थो न भविष्यति।

पूर्वत्रासिद्धम् इति सूत्रस्याधिकारत्वात् परिणामोऽयं भवति यत् 'गोधुङ्मान्' इत्यादिप्रयोगसिद्धिर्भवति। अन्यथा प्रयोगेऽस्मिन् घत्व-जश्त्वानुनासिकानन्तरं भष्भावो नैव भविष्यति। तद्यथा- गोदुह्+मान् इति दशायां घत्वे, जश्त्वे अनुनासिके कृते सति झषन्ताभावे भष्भावस्य सर्वथा अप्राप्तौ' इति कथनम् असङ्गतं भविष्यति। अत्र घत्व-जश्त्वानुनासिकेषु घत्वानुनासिके न वा क्रियेते? अस्यां स्थितौ घत्वजश्त्वानुनासिकानामत्रोल्लेख: किमर्थ:? एतत्समाधानार्थं प्रोच्यते- घत्वजश्त्वानुनासिकेषु घत्वानुनासिकयो: कृतयो: भष्भावो न स्यात्।

वस्तुतस्तु 'पूर्वत्रासिद्धम्' इति अधिकारसूत्रे स्वीकृते सति गोदुह्+मान् हकारस्य घकारे कृते 'झय:'[16] इति सूत्रेण मतुपो मकारस्य वत्वापति:। भष्भावानापत्तिरूपदोषोऽत्र नास्ति। यतोहि हि घत्वेकृते सति अपवादत्वात् जश्त्वमन्तर'त्वादननुनासिकं प्रबाध्य भष्भावो भविष्यतति। अत: 'पूर्वत्रासिद्धम्' इति अधिकारसूत्रम्। विप्रतिषेधसूत्रे यथोद्देशपक्षमेवास्ति। अत: त्रिपादिसूत्राणाम् असिद्धत्वात् तत्र पूर्वं प्रति परस्य बलवत्ताया: वार्ता अस'तैवास्ति। अत एव भाष्यकारेण 'गोधुङ्मान्' इति प्रयोगे वत्वापत्तिरूपदोष एव प्रदर्शित:। एतद्दोषपरिहाराय 'पूर्वत्रासिद्धम्' इति सूत्रस्याधिकारत्वं स्वीकार्यम्। इत्थं स्वीकृते सत्येव 'श्चुत्वं धुटि सिद्धं वाच्यम्' इति वार्तिकस्य चारितार्थ्यम्।

**बाह्यप्रयत्नस्त्वेकादशधा**

बाह्यप्रयत्ना एकादशप्रकारका भवन्ति- विवार: संवार: श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्त: स्वरितश्चेति।

खयां यमा: खय: क: पौ विसर्ग: शर एव च।
एते श्वासानुप्रदाता अघोषाश्च विवृण्वते॥
कण्ठमन्ये तु घोषा: स्यु: संवृता नादभागिन:।
अयुग्मा वर्गयमगा यणश्चाऽल्पासव: स्मृता:॥[17]

वर्गेष्वाद्यानां चतुर्णाम्। पञ्चमे परे मध्ये यमो नाम पूर्वसदृशो वर्ण: प्रातिशाख्ये प्रसिद्ध:। पलिक्क्नी:। चख्खनतु:। अग्ग्नि:। घ्घ्नन्तीत्यत्र क्रमेण कखगघेभ्य: परे तत्सदृशा एव यमा:।

तत्र वर्गाणां प्रथमद्वितीया: खयस्तथा तेषामेव यमा:, जिह्वामूलीयोपध्मानीयौ, विसर्ग:, शषसाश्चेत्येतेषां विवार: श्वासोऽघोषश्च। अन्येषां तु संवारो नादो घोषश्च। वर्गाणां प्रथमतृतीयपञ्चमा: प्रथमतृतीययमौ यरलवाश्चाऽल्पप्राणा:। अन्ये महाप्राणा इत्यर्थ:। बाह्यप्रयत्नाश्च यद्यपि सवर्णसंज्ञायामनुपयुक्तास्तथाप्यान्तरतम्यपरीक्षायामुपयोक्ष्यन्त इति बोध्यम्। कादयो मावसाना: स्पर्शा:। यरलवा अन्तस्था:। शषसहा ऊष्माण:। अच: स्वरा:। क: प इति कपाभ्यां प्रागर्धविसर्गसदृशौ जिह्वामूलीयोपध्मानीयौ। अं अ: इत्यच: परावनुस्वारविसर्गौ।[18]

अत्रेदमप्यवधेयं यद् आभ्यन्तरप्रयत्ने विवृत-संवृतनाम्नाभेदो दृश्यते बाह्यप्रयत्नेऽपि विवार-संवारनाम्ना। तर्हि अनयोर्मध्ये को नाम भेद इत्यवगन्तव्य:। बाह्यप्रयत्नो वर्णानामाविर्भावानन्तरं जायते। आभ्यन्तरप्रयत्नस्तु वर्णाभिव्यक्ते: पूर्वमेव सञ्जायते। तत्र यौ विवृत-संवृतौ परिगणितौ तयोर्मध्ये विवृतप्रयत्नो वर्णाभिव्यक्ते: पूर्वं जिह्वाग्रमध्यमूलस्थानानां दूरत: स्पर्शकरणाद् भवति। एवमेव तत्तत्स्थानानां समीपत: जिह्वाग्रादिस्पर्शत्वात् संवृतो नाम प्रयत्न:।

विवारो नाम गलविवरविकासरूप:, संवारश्च गलविवरसंकोचरूप:। गलविवरविकासे सति ऊर्ध्ववर्ती वायुरेव श्वास: कथ्यते। गलविवरे संकुचिते (संवृते) सति योऽव्यक्त: शब्दो भवति स नाद इति कथ्यते। इत्थं नादरूपकार्यत्वादेवायं नादप्रयत्नोऽभिधीयते। स्थानाभिघातध्वनेस्तथा नादस्य संसर्गेण घोषो भवति। अयं घोषप्रयत्नो नाम घोषरूपकार्यकरत्वात्। इत्थमेव यदा स्थानाभिघातजध्वनौ श्वास: सञ्जायते तदा ध्वनि-श्वासयो: संसर्गेण अघोष नामको गुणो वर्णेष्वभिव्यज्यते। अघोषेऽस्मिन् नञ् रूपम् अल्पार्थकं मत्वा श्रीनागेशभट्टेन अल्पघोषं कथितम्। अल्पा असवो येषु ते अल्पासव: इति व्युत्पत्त्या येषां वर्णानाम्।

यत्र उच्चारणे प्राणवायोरल्पत्वप्रतीतिस्ते वर्णा: अल्पप्राणा: अल्पप्राणत्वसम्पादको प्रयत्नोऽपि अल्पप्राण: कथ्यते। इत्थमेव प्राणवायौ महत्त्वसम्पादको यत्नो महाप्राणपदेन प्रसिद्ध:। श्रीनागेशेनात्र विषयसम्पोषाय पाणिनीयशिक्षावचनमपि समुस्थापितम्।।

**सन्दर्भ:—**


1. सिद्धान्तकौमुदी, टीकात्रयोपेता, पृ. 4

2. स्वज्ञस्यधीनज्ञस्यपेक्षत्व स्वाधीनोत्पत्तिकापेक्षत्वान्यतरवत्त्वमन्योन्याश्रयसामान्यलक्षणम्। नित्यानन्दपर्वतीय लघुशब्देन्दुशेखरदीपके, पृ.-14 (जयकृष्णदास, हरिदासगुप्त:, चौखम्बा वाराणसी, 1938)

3. स्यादेतत्। 'न विभक्तौ'(1.3.4) इत्यादे: सार्थक्याय 'हलन्त्यम्' (1.3.3) इत्यस्योपदेशेऽन्त्यंहल् इदित्यर्थस्यावश्यकत्वेन 'हलन्त्यम्' (1.3.3) आदिरन्त्येन (1.1.71) इत्यनयो: परस्परापेक्षत्वेनाऽन्योन्याश्रया'कारे इत्संज्ञामबोधयित्वा हलामित्संज्ञाबोधनं पाणिनेरयुक्तम्, लघुशब्देन्दुशेखरे, पृ. 37

4. अन्योन्याश्रयत्वं नाम परस्परसापेक्षकत्वम्। यथा-वाक्यार्थज्ञाने पदज्ञानं पदार्थज्ञानञ्च कारणं भवतीति सिद्धान्तात् कस्तावत् इत्पदार्थ:? इति जिज्ञासायाम् 'आदिरन्त्येन सहेता' इति सूत्रं स्वघटक-इत्पदज्ञानाय 'हलन्त्यम्' इति सूत्रमपेक्षते। तथा च 'हलन्त्यम्' इत्यत्रापि इत्पदार्थविधेयताया: उद्देश्यतावच्छेदकत्वेन हल्त्वस्य ज्ञानमित्पदार्थज्ञानाधीनम्' तस्मात् 'हलन्त्यम्' इति सूत्रम् 'आदिरन्त्येन सहेता' इति इतिसूत्रमपेक्षते। तेन हल्पदज्ञानं इत्पदज्ञानाधीनम्। इत्पदज्ञानञ्च हल्पदज्ञानाधीनमिति परस्परसापेक्षरूपोऽन्योन्याश्रय:। -लघुशब्देन्दुशेखरे श्रीटिप्पणी, पृ. 27

5. रूढौ तु न मानमत: सूत्रावृत्त्या तं परिहरति-हलन्त्यमिति।—लघुशब्देन्देशेखरे, पृ. 41

6. भाष्येऽप्यन्योन्याश्रयमाश'य 'हलन्त्यमित्यसंज्ञं भवति लकारश्चेद्धवतीति वक्तव्यम्' इत्युक्त्वा 'एकशेषनिर्देशाद्वा सिद्धम्, हल् च हल् च ल्-हलन्त्यमित्' इत्युक्तम्। तस्यायं भाव:,-'कृतैकशेषेण हल्पदेन सम्बन्धसामान्यषष्ठ्या समासोऽन्त्यशब्दस्य च द्वन्द्वान्ते श्रूयमाणस्येवोभयत्रान्वय:, एवञ्च हल्सूत्रान्त्यं हलूपान्त्यञ्चेति बोध:।-लघुशब्देन्दुशेखरे, पृ. 41-42

7. सिद्धान्तकौमुदी, टीकात्रयोपेता, पृ. 4

8. अष्टाध्यायी, 1.1.71

9. अष्टाध्यायी, 1.1.67

10. अष्टाध्यायी, 2.3.19

11. सिद्धान्तकौमुदी, लक्ष्मीटीकाया, पृ. 17

12. वैयाकरणसिद्धान्तकौमुदी, पृ. 5

13. वैयाकरणसिद्धान्तकौमुदी, पृ. 6

14. वैयाकरणसिद्धान्तकौमुदी, टीकात्रयोपेता, पृ. 11

15. सिद्धान्तकौमुदी, टीकात्रेयोपेता, बालमनोरमा, पृ. 12

16. अष्टाध्यायी, 8.2.10

17. वैयाकरणसिद्धान्तकौमुदी, टीकोत्रेयोपेता पृ. 12

18. वैयाकरणसिद्धान्तकौमुदी, टीकोत्रेयोपेता पृ. 12

**सन्दर्भिकाः**


4. वैयाकरणसिद्धान्तकौमुदी-भट्टोजिदीक्षित, लक्ष्मीटीका 1-2, सभापति-शर्मोपाध्याय; मोतीलाल बनारसीदास, वाराणसी
5. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा तत्त्वबोधिनी सहित, वासुदेव दीक्षित-ज्ञानेन्द्रसरस्वती)-भट्टोजिदीक्षित, वाराणसी, 1979
6. वैयाकरणसिद्धान्तमञ्जूषा-नागेशभट्ट, वाराणसी-1977
7. वैयाकरणसिद्धान्तलघुमञ्जूषा-नागेशभट्ट, वाराणसी-1977
8. वैयाकरणसिद्धान्तपरमलघुमञ्जूषा-नागेशभट्ट, वाराणसी-1977
9. वैयाकरणसिद्धान्तकौमुदी, भाग प्रथम-भट्टोजिदीक्षित (सं. गोपालदत्त पाण्डेय), चौखम्बा विद्या भवन, वाराणसी-1997
10. वैयाकरणसिद्धान्तकौमुदी, लघुमञ्जूषा-नागेशभट्ट वाराणसी-1924
11. वैयाकरणभूषणसार: -कौण्डभट्ट, बनारस-1934
12. व्याकरणे नागेशभट्टकृतिषु तन्त्रस्य प्रभाव: -डॉ. राजनाथ त्रिपाठी, विश्वविद्यालय प्रकाशन, वाराणसी
13. व्याकरण की दार्शनिक भूमिका -डॉ. सत्यकाम वर्मा-1971
14. व्याकरण दर्शन भूमिका -रामाज्ञा पाण्डेय, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी-1971
15. व्याकरणमहाभाष्यम् (नवान्हिकं)-पतञ्जलि: (अनुवादक-चारुदेव शास्त्री), मोतीलाल बनारसीदास, वाराणसी-1999
16. व्याकरणमहाभाष्यम् (प्रदीपोद्द्योत सहित) -पतञ्जलि, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली
17. व्याकरणशास्त्र का इतिहास, भाग-द्वितीय-पण्डित युधिष्ठिर मीमांसक, सोनीपत-1984
18. शब्दकौस्तुभ, भाग-प्रथम-भट्टोजिदीक्षित, चौखम्बा संस्कृत सीरीज, वाराणसी -1991
19. शब्दकौस्तुभ, भाग-द्वितीय-भट्टोजिदीक्षित, चौखम्बा संस्कृत सीरीज, वाराणसी -1991
20. शिशुपालवधम्-माघ, चौखम्बा सुरभारती प्रकाशन, वाराणसी-1991
21. श्रीमद्भगवद्गीता—गीता प्रेस, गोरखपुर
22. संस्कृतव्याकरणशास्त्र का इतिहास-युधिष्ठिर मीमांसक, सोनीपत-1984
23. संस्कृत व्याकरण का उद्भव एवं विकास-डॉ. सत्यकाम वर्मा, प्र.सं. 1971
24. संस्कृत साहित्य का इतिहास-वाचस्पति गैरोला, चौखम्बा वाराणसी-1985

25. संस्कृत शास्त्रों का इतिहास-बलदेव उपाध्याय, शारदामन्दिर, दुर्गाकुण्ड, वाराणसी, प्र.सं. 1969

26. Bhattoji Dikhita : His Contribution to Sanskrit Grammer-by Dr. Suryakanta Bali.